# Journal of Veda Saṁskṛta Academy

Recognised in the UGC-CARE List
A National Peer-Reviewed Research Journal
विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता
मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

Volume : XVIII
July to December - 2021

वेद संस्कृत अकाडेमि (पं.)
VEDA SAMSKṚTA ACADEMY (R.)
सत्यं ज्ञानमनन्तम्
ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿ (ನೋ.)

*Edited by the Director :*
**Dr. Gopalkrishna Hegde**
Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Scanned with OKEN Scanner

ISSN 2250-1711

॥ सत्यं ज्ञानमनन्तम् ॥

# JOURNAL OF VEDA SAMSKRITA ACADEMY

**Recognised in the UGC-CARE List**

**A NATIONAL PEER-REVIEWED RESEARCH JOURNAL**

**विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता**
**मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका**

**VOLUME: XVIII**
**July to December - 2021**

Editor in Chief
**DR. GOPALKRISHNA HEGDE**
[Jyotishashastra-Dharmashastra Vidwan]

**VEDA SAMSKRITA ACADEMY (R.)**
[Formerly: Veda Samskrita Prasarinee Sabha]
[No.: DR : SOR : 108 : 2003-04 Dated : 30-10-2003]

Scanned with OKEN Scanner

Title of the Journal : **Journal of Veda Samskrita Academy**
A National Peer-Reviewed Research Journal
मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

ISSN : **2250-1711**

Editor & Publisher : **Dr. Gopalkrishna Hegde**
gopalkrishnh9@gmail.com
09741847399
Director,
Veda Samskrita Academy (Regd.)
Kalkod Road, HEGDE- 581330
Kumta, Uttara Kannada, Karnataka

web site : www.vedasamskritaacademy.org
E-mail : vedasmkac@gmail.com

All rights are Reserved with the Publisher

" All opinion / views expressed in the research papers are of the authors only, no way they are ascribed to the Academy"

Languages : Samskrita, Kannada, English,Hindi

Imprint : Volume XVIII
July to December – 2021

Paper : 70gsm (B2B) and Art paper – 300gsm
Size of the Journal : 21 X 14 cm
Number of Pages : 369 + 16 + 4 (colour page)
Number of Copies : 150
D. T. P. : Pavan Graphics, Hegde
Art works : Girish R. Bhat, Digital World
Printing & Binding : Shri Krishna Mudranalaya, Hegde

**Price : Rs. 300 /- per volume**

Scanned with OKEN Scanner

13. मार्तण्डसोमयाजिग्रन्थोक्त–षोडशसंस्काराः 102-109
–विद्वान् राजराजेश्वर एन्. जोशि (मैसूरु)

14. ईशावास्य–केनोपनिषदोः सामान्यपरिचयः 110-115
–डा. सञ्जिब सरकार (मुम्बई)

15. अप्रतीकालम्बनाधिकरणस्य रत्नप्रभाद्यनुसारेण विमर्शः 116-123
–कार्तिक शर्मा के. (एर्नाकुलम्)

16. संस्कृतसाहित्ये अलङ्कारस्य स्थानम् 124-127
–डा. भीमानायक एस्. (बेङ्गळूरु)

17. यङ् लुक् विचारः 128-131
–आर् श्रीनिवासन् (चेन्नै)

18. पिण्डोत्पत्तिप्रकरणम् 132-136
–डा. सिद्दप्प बि. करेप्पगोळ (बेङ्गळूरु)

19. वेदबोधकं रामायणम् 137-142
–एस्. बृहदा प्रसन्ना (तिरचिरपल्लि)

20. भासनाटके नवरसाः 143-147
–वाय्. षण्मुग प्रियदर्शिनि (चेन्नै)

21. भारतीयज्ञानपरम्परायां लौकिकविज्ञानविचाराः 148-157
–गणेश भट्ट (हरियाणा)

22. अभिधामूलका व्यञ्जना 158-166
–डा. रेखादेवि एस्. एच्. (बेङ्गळूरु)

23. श्रुतिप्रत्यक्षयोः विरोधपरिहारविचारः 167-171
–डा. गणपति वि. हेगडे (मुम्बई)

24. तात्पर्यार्थवादः 172-176
–डा. मनमोहन तिवरी (प्रयागराज)

25. राजनीतिषु राजगुणदोषाणां महत्वचिन्तनम् 177-186
–डा. वेङ्कटरमण हेगडे (मैसूरु)

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVIII : July to December – 2021

# संस्कृतसाहित्ये अलङ्कारस्य स्थानम्

**Dr. Bheemanaik S**
Asst. Professor,
Karnataka Samskrit University
Bangalore, Karnataka

कवेः कर्म एव 'काव्यम्" इति मनीषिणः। तत्र कविः स्वकर्मवशाद् एव कविः इति अभिधानं भजते। श्रेष्ठकवौ सति काव्यं च श्रेष्ठं भवति। तस्मात् रसभावरूपादियुक्तस्य अर्थतत्वस्य गुणान्वितवाणिः अलौकिकप्रतिभया वैशिष्ट्यं प्रकटीकरोति।

साङ्गाः वेदाः इतिहासश्च प्रकारद्वयं च अस्माकं भारतास्य साहित्यवृक्षस्य मूलम्। वेदेतिहासेभ्य एव ज्ञानवाहिनी निरन्तरेण प्रवहति। 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति खलु गीतोक्तिः। अतः ज्ञानस्य विभागः अस्माकं पूर्वजाः कृतः। शास्त्राध्ययनसौकर्याय विद्यापि द्विविधा विभक्ता, परा–अपरा चेति। एका परा ब्रह्मविषयिणी, द्वितीया तु लौकिकी। उभयेपि विद्ये सेव्ये। प्रस्तुतस्तु अलंकारः अपरा विद्यायाः विषयः।

अलङ्कारशब्दस्तु वेदोपनिषत्स्वपि सुप्रसिद्धः प्रतिभाति। मुनेः भरतस्य नाट्यशास्त्रे शुद्धालङ्काररूपेण चत्वरोअलङ्काराः एव निर्दिष्टाः ते च

उपमा रुपकं चैव दीपकं यमकं तथा।
अलङ्कारास्तु विजेयाश्चत्वारो नाटकाश्रयाः॥ नाट्यशास्त्रे .१७. ४२.

अलङ्कारशास्त्रे काव्यस्वरुपरसदोषगुणरीत्यलङ्काराणामपि निरुपणीयत्वे अस्यालङ्कारनाम्नैव व्यपदेशस्य बीजं तत्वतः प्रच्छन्नमस्ति। तथापि अलङ्क्रियते अनेनति करणव्युत्पत्तिनिष्पन्नो यमकोपमादिबोधको नायमलङ्कारशब्दः किन्तु 'अलङ्कृतिरलङ्कारः। इति भावव्युत्पन्नो दोषापगमगुणालङ्कारसंवलनकृतसौन्दर्यपरः। अत्र मानन्तु "काव्यं ग्राह्यमलङ्कारत्" सौन्दर्यमलङ्कारः सदोषगुणालङ्कारहानोपादानाभ्याम् इत्यादि वामनसूत्रमेव।
अलङ्कारशास्त्र भवः अलङ्कारिणा उदयति भामः, दण्डी, वामनः, उद्भट, रूद्रट, आनन्दवर्धन, कुन्तकः भोजः, मम्मटादि अनेकानाम् आलङ्कारिकाणां परिचयः अस्ति, परन्तु जयदेवेन "चन्द्रालोक नामके ग्रन्थे एकस्यामेव कारिकायामलङ्कराणां लक्षणं, तथोदाहरणं च निरुप्यैक सरलो नूतनश्च मार्गः आविष्कृतः।

अस्मिन्नलङ्कारशास्त्रे तमेव मार्गमश्रित्य महाविदुषा अप्पय्यदीक्षितेनापि कुवलयान्द नामा ग्रन्थो व्यरचि । अयं च ग्रन्थोलोकक्रियायाः अलङ्कारविषयकसामान्यहारन् र्धकक्ष्चेति समेषां जनानां मनोपीगधिरुढतया प्रभ्रजत ।

उपमालङ्कारः-

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥

यत्र तस्मिन् काव्ये द्वयोर्वतुनोरुपमानोपमेयत्वेन प्रसिद्दयोःसादृश्यस्य लक्ष्मीः संपत, सहृदयहृदयाह्लादि सादृश्यमित्यर्थः,उल्लसति उद्भततया स्पष्टं प्रकाशते सा तथाभासमाना सादृश्यलक्ष्मीरुपमा इति लक्षणम् । हे कृष्ण ते तव कीर्तिः हंसीव स्वर्गङ्गामाकाशगङ्गामवगाहते इत्यदाहरणम् ।अत्र कीर्तिहंस्योः सादृश्यलक्ष्मीः स्पष्टं प्रकाशत इत्युपमालङ्कारः ।

उपमायाः सन्ति चत्वारोअवयवाः उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकक्ष्चेति । तत्राधिकगुणवत्वे प्रसिद्दमुपमानं चन्द्रादि । प्रकृते वर्ण्यमानं मुखाद्युपमेयं न्यूनगुणम् ।अह्लादकत्वादिकं साधारणो धर्मः ।इवादि शाब्दाः सादृश्यवाचकाः ।सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् ।

अनन्वयालङ्कारः –

उपमानोपमेयत्वे यदेकस्यैव वस्तुनः ।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥

एकस्यैव वस्तुनः यदुपमानत्वमुपमेत्वं च विवक्ष्यते तदनन्वयालङ्कारः । स्वस्य स्वेनैव सादृश्यं नान्वेतीत्यनन्वयसंना । तथावर्णनस्य प्रयोजनं सदृशवस्त्वरव्यवच्छेदे–नापमत्वद्योतनम् । उपमायां द्वयोःसादृश्यवर्णनमत्र त्वेकस्य तेनैवेति भेदः । इन्दुरिन्दुरिव श्रीमानित्यत्र इन्दोरेकस्यैवोपमानत्वमुपमेयत्वं च वर्णितमित्यनन्वयालङ्कारः ।

उल्लेखालङ्कारः –

बहुभिर्बहुधोल्लेखादेकस्योल्लख इष्यते ।
स्त्रीभिः कामोअर्थिभिः स्वर्दुः कालः शत्रुभिरैक्षि सः ॥

Scanned with OKEN Scanner

यत्र नानाविधधर्मयोगि एकं वस्तु तत्तद्धर्मयोगरुपनिमित्तभेदेन अनेकेन ग्रहीत्रा अनेकधा उल्लिख्यते । तत्र उल्लेखः। अनेकधा उल्लेखने रुच्यर्थित्वभयादिकं यथार्ह प्रयोजकम्। रुचुरभिरतिः ।अर्थित्वं लिप्सा । स्त्रीभिः इत्याद्युदाहरणम् ।अत्र एक एव राजा सौन्दर्य वितरण पराक्र शालीति कृत्वा स्त्रीभिः अर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः काम कल्पतरु कालरुपो दृष्टः।

तुल्ययोगितालङ्कारः–

वर्ण्यानामितरेषां वा धर्मैकयं तुल्ययोगिता ।
सङ्कुचन्ति सरोजानि स्वैरिणी वदनानि च ॥

प्रस्तुतानाम् अप्रस्तुतानां वा गुणाक्रियारुपैकधर्मान्वयस्तुल्ययोगिता ।सङ्कुचन्तिति प्रस्तुत तुल्ययोगिताया उदाहरणम् ।तत्र प्रस्तुतचन्द्रोदय कार्यतया वर्णनीयानां सरोजानां प्रकाशभीरु स्वैरिणी वदनानां च सङ्कोचरुपैकक्रियान्वयो दर्शितः । उत्तरश्लोके नायिका सौकुमार्यवर्णने प्रस्तुते अप्रस्तुतानां मालत्यादीनां कठोरतारुपैकगुणान्वयः ।

प्रतिवस्तूपमालङ्कारः–

वाक्ययोरेकसामान्ये प्रतिवस्तुपमा मता ।
तापेन भ्रजते सूरः शूरश्चापेन राजते ॥

यत्र उपमानोपमेयवाक्ययोः एकः समानो धर्मः पृथङ् निर्दिश्यते सा प्रतिवस्तुपमा ।प्रतिवस्तु प्रतिवाक्यार्थम् उपमा समानधर्मोअस्याम् इति व्युत्पत्तेः । यथा अत्रैव भ्रजते राजते इति एक एव धर्मः उपमानोपमेयवाक्ययोः पृथग् भिन्नपदाभ्यां निर्दिष्टः ।

कुवलयानन्दकारेन स्वकृतिषु शुभाशुभकुनानां यथास्थानं सम्यग्वर्णनं कृतं विद्यते । आनन्देन स्पष्टतया वक्तुं शक्यते यत् कुवलयानन्दकरः संस्कृतसाहित्यस्य अद्वितीयजाज्वल्यमान नक्षत्र इव वर्तते । प्रमुखः अलङ्कारः उपमा, अनन्वय, उल्लेख, तुल्ययोगित, प्रतिवस्तुपमलङ्कारः। एते अप्पतदिक्षितनुसारेन प्रमुक अलङ्कारः । अयं प्राचीनभारतीयेतिहासस्य अन्तरात्मप्रतिनिधिरस्ति । एतत्कृतिषु अस्माकं संस्कृतेः प्राणं संरक्षितं वर्तते ।

*******

Scanned with OKEN Scanner

## सन्दर्भसूची

१. अलङ्कारशास्त्रस्येतिहासः
२. संस्कृतसुगन्धः
३. साहित्यदर्पणः
४. काव्यालङ्कारसूत्रवृत्तिः
५. काव्यप्रकाशः

**Dr. Bheemanaik S**
Asst. Professor
Karnataka Samskrit University
Pampa Mahakavi Road
Chamarajapet, Bangalore- 560018
Karnataka, India
Mob: 7795634009
Email Id: beema87naik@gm

********

Scanned with OKEN Scanner